निवेषत। बलोपधिकृते द्वे तु तृतीयमनुरागजम्” इति। एतेषां स्वरूपं दर्शयति स एव “अनिच्छन्त्या यत् क्रियते सुप्तोन्मत्तप्रमत्तया। विलपन्त्या वा रहसि बलात्कारकृतन्तु तत्। छद्मना गृहमानीय दत्त्वा वा मदकारणम्। संयोगः क्रियते यत्र तदुपधिकृतं विदुः। अन्योन्यचक्षूरागेण दूतीसंप्रेषणेन वा। कृतं रूपार्थलोभेन ज्ञेयं तदनुरागजम्” इति। अनुरागजसंग्रहस्य त्रिविधत्वं दर्शयति स एव “तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम्” इति। व्यासोऽपि “संग्रहस्त्रिविधो ज्ञेयः प्रथमो मध्यमस्तथा। उत्तमश्चेति शास्त्रेषु लक्षणं च पृथक् पृथक्” इति। एतेषां स्वरूपमाह तत्र्यासवृहस्पती “कटाक्षावेक्षणं हास्यं दूतीसंप्रेषणं तथा। स्पर्शो भूषणवस्त्राणां प्रथमः संग्रहः स्मृतः। प्रेषणं गन्धमाल्यानां फलधूपान्नवाससाम्। सम्भाषणञ्च रहसि मध्यमं संग्रहं विदुः। एकशय्यासनं क्रीड़ा चुम्बनालिङ्गनं तथा। एतत् संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः” इति। स्त्रीसंग्रहणस्य ज्ञानोपायमाह याज्ञवल्क्यः “पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया। सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा” इति। परभार्यया सह केशाकेशि क्रीड़नेन सद्यः अभिनवैः कामजैः करजदन्तदशनादिक्षतव्रणादिलिङ्गैर्द्वयोः सम्प्रतिपत्तावयं स्त्रीसंग्रहणवान् इति प्रतिपत्तव्य इत्यर्थः। उपायान्तरमाह स एव “नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्। अदेशकालसम्भाषः सहैकस्थानमेव च” इति। कुर्वाण इति शेषः। सक्थि ऊरुः। मनुरपि “स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत् तया। परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्”। यस्तु दर्पादिना मयेयं भुक्तेति वदति सोऽपि तथाविधत्वेन ग्राह्य इत्याहतुर्मनुनारदौ “दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं वदेत्। पूर्वं मयेयं भुक्तेति तच्च संग्रहणं स्मृतम्” इति। बलात्कारकृतस्य स्त्रीसंग्रहणस्य साहसान्तर्भूतत्वेन तत्रैव दर्शितत्वादुपधिकृते दण्डमाह वृहस्पतिः “दर्पाद्वा कामयेद्यस्तु तस्य सर्वहरो दमः। अङ्कयित्वा भगाङ्केन पुरान्निर्वासयेत्ततः” इति। सर्वहरः सर्वस्वहरः एतत् सजातीयविषयम्। हीनोत्कृष्टागमने तु क्रमेणार्द्धं धनं सर्वस्वहरणरूपो वधसहितसर्वस्वहरणरूपो वा दण्डोऽवगन्तव्यः। “दमानेयः समायान्विति” साहसवादनिरूपण-

दर्शितवचनात्। तत्र वचने पुरुषस्यापकर्षाभावे युक्तौ दण्डो न स्त्रिया इति नोक्तस्तस्याः दण्डः, तेन साहसस्त्रीसंग्रहणवत् प्रकृतेऽपि सजातीयापभुक्तायाः संव्यवहार्य्यायाः प्रायश्चित्ताचरणानन्तरं पुनरपि तत्रोपभुक्ताया इति ज्ञातव्यमित्युक्तं मदनरत्ने। अनुरागजत्रिविधसंग्रहणे दण्डमाह स एव “त्रयाणामपि चैतेषां प्रथमो मध्यमोत्तमौ। विनयः कल्पनीयः स्यादधिकोद्विगुणाधिकः” इति। अधिकः प्रथमसाहसाद्द्विगुणोऽधिकः। सम्भोगे दण्डमाह याज्ञवल्क्यः “स्वजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः। प्रातिलोम्ये वधः पुंसां नार्य्याः कर्णादिकर्त्तनम्” इति। चतुर्णामपि वर्णानां बलात्कारेण सजातीयपरभार्य्यागमने साशीतिपणसहस्रो दण्डः। यदा त्वानुलोम्येन हीनजातीयागमनं तदा मध्यममाहसः। उत्कृष्टजातीयागमने गन्तुर्वधः। तस्याः कर्णादिकर्त्तनमित्यर्थः। एतच्चानुरागजग्रहणविषयं स्त्रिया अपि दण्डाभिधानात्। बलात्कारोपधिकृतयोस्तु स्त्रिया अनपराधित्वेन दण्डाभावात्। अस्मादेव प्रातिलोम्येन गमने पुरुषस्य वधं विधाय स्त्रियास्तदर्द्धतुल्यकर्णनासादिकर्त्तनविधानात् सजातीयागमने पुरुषस्य यावुक्तावुत्तममध्यमसाहसौ दण्डौ तदर्द्धं स्त्रिया दण्ड इति सूचितम्। अतएव कात्यायनः “सर्वेषु चापराधेषु पुंसो ह्यर्थदमस्तथा। तदर्द्धं योषितो दद्युर्वधे पुंसोऽङ्गकर्त्तनम्”। इति। स्त्रिया इति शेषः। यदा पुनः सवर्णामगुप्तां आनुलोम्येन गुप्तां वा व्रजति तदा विशेषमाह मनुः “सहस्रं ब्राह्मणो दण्ड्योऽगुप्तां विप्रां बलाद् व्रजन्। शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः। सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्। शूद्रायां क्षत्रियविशोः साहस्रन्तु भवेद्दमः” इति। ते क्षत्रियवैश्यौ। एतच्च गुरुसखिभार्य्यादिव्यतिरिक्तविषयम्। तत्र दण्डान्तरविधानात्। तदाह नारदः “माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा। पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा। दुहिता चार्य्यभार्य्या च सगोत्रा शरणागता। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या। शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते” इति। यत्तु प्रातिलोम्येन गमने क्षत्रियादेः पुरुषस्य वध इत्युक्तं योगीश्वरवचने। तद्गुप्ताविषयमन्यथाऽर्थदण्डः। तथा च मनुः “उभावपि हि तावेव ब्रा-